
विद्वान् सर्वत्र पूज्यते



# संस्कृतवाङ्मये व्याकरणस्य भूमिका

# Saṃskṛtavāṅmaye Vyākaraṇasya Bhūmikā

# ಸಂಸ್ಕೃತವಾಙ್ಮಯೇ ವ್ಯಾಕರಣಸ್ಯ ಭೂಮಿಕಾ

राष्ट्रियविचारसङ्गोष्ठीप्रबन्धसङ्ग्रहः

ಸಂಪಾದಕರು

ಡಾ. ನಾಗೇಂದ್ರ, ಡಾ. ಮಂಜುನಾಥ ಭಟ್ಟ, ಡಾ. ಮಹೇಶ ಭಟ್ಟ

# संस्कृतवाङ्मये व्याकरणस्य भूमिका
## saṃskṛtavāṅmaye vyākaraṇasya bhūmikā
## ಸಂಸ್ಕೃತವಾಙ್ಮಯೇ ವ್ಯಾಕರಣಸ್ಯ ಭೂಮಿಕಾ

( राष्ट्रियविचारसङ्गोष्ठीप्रबन्धसङ्ग्रहः )


ಸಂಪಾದಕರು:

**ಡಾ. ನಾಗೇಂದ್ರ**

**ಡಾ. ಮಂಜುನಾಥ ಭಟ್ಟ**

**ಡಾ. ಮಹೇಶ ಭಟ್ಟ**



**ವಾಚಸ್ಪತಿ ಪ್ರಕಾಶನ**

ಬ್ಯಾಂಕ್ ಕಾಲೋನಿ ರಸ್ತೆ

ಬೋಗಾದಿ, ಮೈಸೂರು–570026

**SAṂSKṚTAVĀṄMAYE VYĀKARAṆASYA BHŪMIKĀ**

Edited by:

**Dr. Nagendra**
Asst. Professor, SKSVA College, Adichunchanagiri
Nagamangala Taluk, Mandya District

**Dr. Manjunatha Bhat**
Asst. Professorm Sri Matha Sanskrit College
Ummachagi, Yellapur Taluk, Karawara Disrtict, Karnataka 581347

**Dr. Mahesh Bhat**
Asst. Professorm Sri Matha Sanskrit College
Ummachagi, Yellapur Taluk, Karawara Disrtict, Karnataka 581347

Published By:
**Vachaspati Prakashana**
Bank Colony Road,
Bogadi Village,
Bogadi, Mysuru – 570026.

**ISBN: 978-93-93078-09-4**

First Impression : 2021
Pages : ix + 158 = 167
© : Editors
Copies : 100
Price : Rs. 160/-

Cover Page Design : Maa Printers, Bangalore

Printed at : Maa Printers, Bangalore

# ॥ अनुक्रमणिका ॥


| अ.सं | शीर्षकः | लेखकः | पृष्ठसङ्ख्या |
|---|---|---|---|
| 1. | **Grammar as a tool for linguistic appraisal of Sanskrit and other languages** | प्रो.वि.गिरीशचन्द्रः | 01 |
| 2. | आगामिदशके व्याकरणविषये अपेक्षितानि परिवर्तनानि | बी.वी.वेङ्कटरमणः | 07 |
| 3. | व्याकरणशास्त्रे अर्थशेषवाचकाः शब्दाः | डा.शिवरामभट्टः | 12 |
| *4.* | सङ्केतविचारे काव्यशास्त्रे व्याकरणशास्त्रस्य भूमिका | *महाबलभट्टः, गोवा* | 18 |
| 5. | स्तोकं पचतीत्यादावभेदान्वयबोधविचारः | डा. राघव के. एल्. | 24 |
| 6. | हैमव्याकरणवैशिष्ट्यम् | डा. उदयन हेगडे | 32 |
| 7. | संस्कृते संभाषणे नूतनशब्दानां प्रयोगः तस्य अनिवार्यता दैनन्दिने | डा.पद्मावति सिङ्गारि | 42 |
| 8. | व्याकरणदृष्ट्या भट्टिकाव्यपरिशीलनम् | मधुसूदन अडिगः | 46 |
| 9. | व्याकरणाद्वेद्याः लोकव्यवहाराः | बि. अमरनाथशर्मा आचार्यः | 53 |
| 10. | अपभ्रंशशब्दाः | प्रो. सुब्रायभट्टः | 56 |
| 11. | व्याकरणशास्त्रस्य महत्त्वम् | डा. हेच्.रविचन्द्रः | 60 |
| 12. | नाट्यशास्त्रस्य वाचिकाभिनयोऽक्तं व्याकरणम् | डा. नवीन भट्टः | 64 |
| 13. | कालिदासकाव्ये व्याकरणांशाः | रवीन्द्र गणपति कोमारः | 68 |
| 14. | संस्कृतवाङ्मये व्याकरणं नवविधम् | डा. तिरुमलः | 77 |
| 15. | संस्कृतव्याहारव्यवहारः सिद्धान्तकौमुदी च | वि. वनराज बि. के. | 80 |
| 16. | शर्करामिव गोक्षीरे वाचोयुक्तिं निवेशय | विद्वान्. उमामहेश्वरः एन् | 86 |
| 17. | अमरकोशे व्याकरणविचाराः | गणेशप्रसाद के. एस्. | 89 |
| 18. | पाणिनीयवर्णोच्चारणविज्ञानद्वारा भाषासंरक्षणम् | डा. श्रीकृष्णभट्टः | 94 |
| 19. | व्याकरणे वैज्ञानिकांशः | विद्वान्.अमरगोपालः | 99 |
| 20. | काव्यप्रपञ्चे व्याकरणाश्रिताः कविसमयाः | सूर्य हेब्बार् ए | 103 |
| 21. | उपमाऽलङ्कारस्य व्याकरणाधारितभेदाः | नारायन सामाइ | 111 |
| 22. | व्याकरणसम्भद्धविषयाः | विदुषी लता पाटील | 116 |
| 23. | व्याकरणवेद्याः लोकव्यवहाराः | सत्यकाम आर्यः | 122 |
| 24. | काव्यशास्त्रीयतत्त्वप्रतिपादने व्याकरणशास्त्रस्य पार्ष्किकता | ब्रजेश-कश | 127 |
| 25. | ಅಲಂಕಾರಗಳ ವಿಕಾಸದಲ್ಲಿ ಯಾಸ್ಕ,ಪಾಣಿನಿ ಮತ್ತು ಪತಂಜಲಿಯರ ಪಾತ್ರ | ಪ್ರೊ.ಕೆ.ಕೃಷ್ಣಮೂರ್ತಿ ಮಯ್ಯ | 139 |

# संस्कृतव्याहारव्यवहारः सिद्धान्तकौमुदी च

**विद्वान्. वनराज बि. के.**
सहायकप्राध्यापकः
कर्णाटकसंस्कृतविश्वविद्यालयः
बेङ्गलूरु
Email: vanakadu@gmail.com

**प्रस्तावना**

संस्कृतभाषा प्रपञ्चस्य प्राचीनतमा भाषा वर्तते। पूर्वं तु भारते सर्वत्र संस्कृतभाषया एव सर्वे जनाः व्यवहरन्तः आसन्। न केवलं नागराः विद्वांसः किन्तु जानपदाः ग्राम्याः अपि अनयैव भाषया सम्भाषमाणाः अवर्तन्त। परं गच्छता कालेन भूरिशः परिवर्तनानि समागतानि। अस्याः भाषायाः एव इतराः नैकाः देशीयभाषाः प्रादुरभवन्। तदनु ताः एव देश्यभाषाः समाजे प्राचुर्यं भेजुः । अतः कालक्रमेण संस्कृतव्याहारभास्करः सामाजिकव्यवहाराकाशात् अस्तङ्गतप्रायो बभूव। तस्य गीर्वाणव्याहारस्य पुनः व्यवहारं प्रति आनयनाय पूर्वव्यावहारिकस्वरूपम् अवश्यं ज्ञानीयम् । आग्रामीणनागरम् उपयुज्यमानाः गीर्वाणवाणीपदानि सिद्धान्तकौमुद्यां सूत्रोदाहरणसन्दर्भे बहुधा निगदितानि। तेषाम् अध्ययनेन अधुनापि संस्कृतभाषया व्यवहारः शक्यः इति विचारः विज्ञायते। अतः सिद्धान्तकौमुदीरीत्या संस्कृतव्याहारव्यवहारः अत्र चर्चितः।

- **संस्कृतव्याहारः**

'जय जय हे भगवति ! सुरभारति ! तव चरणौ प्रणमामः' इति सर्वैः पुत्रकसदृशैः संस्कृतज्ञैः भगवदुचितगौरवादरैः सर्वदा समाराध्यमाना संस्कृतभाषा मातृभाषा मातृभाषाणामपीति जेगीयते। अमृतमधुरा हृद्या मञ्जुला सर्वमनोहारिणी चासौ वर्तते। 'संस्कृतम्' इत्यन्वर्थाभिधेयं दधानः असौ सुरव्याहारः ऋषिकोटिप्रणीतव्याकरणादिनानाशास्त्रैः परिपूर्णः परिपूतश्च विद्यते। यल्लिख्यते तदेव भण्यते, यद्भण्यते तदेवात्र लिख्यते इति अस्य व्याहारस्य इतरातिशयित्वरूपं वैशिष्ट्यं जगज्ज्ञातम् । प्रतिपदमत्र व्युत्पत्त्यधीनमेव । अत्रैव शब्दापशब्दप्रयोगेण धर्माधर्मोत्पत्तिरस्तीति श्रूयते। किञ्च अन्तर्निहितपवित्रांशा एषा स्वयं पूता त्रिदशभाषा

सर्वान् ज्ञातॄनपि भृशं पावयति । तस्मात् विश्वस्तरे अपि परममनोज्ञा असौ संस्कृतभाषा अधुनापि अक्षीणान्तस्सत्त्वा विराजते।

- **संस्कृतव्याहारव्यवहारः**

प्राचीनभारते आसेतुहिमाचलम् आबालवृद्धम् आग्रामीणनागरं संस्कृतव्याहारव्यवहारः आसीत् । तदेयं भाषा सर्वजनजिह्वानर्तकी भूत्वा व्यराजत । प्राधान्येन तदा वैदिकलौकिकभेदेन संस्कृतव्यवहारः द्विधा विभक्तः आसीत् । तदुक्तम् **-यथा लौकिकवैदिकेषु** [१] इति । वैदिकशब्दानां छन्दोनाम्ना लौकिकभाषायाः भाषाशब्देनैव व्यवहारः दृश्यते अष्टाध्यायाम् - **भाषायां सदवसश्रुवः** [२] **बहुलं छन्दसि** [३] चेत्यादीनि । गच्छता कालेन इयं सुरवाणी स्वसदृशीः अन्याः बह्व्यो भाषाः प्रासूत । तास्तु भारते प्राचुर्यं भेजुः । आधुनिके तु काले अस्मिन् संस्कृतज्ञाः तदधीतिनः वा एव इमां वाचं प्रयुञ्जते । पुनः सामान्यव्यवहारपथे संस्कृतभाषामानेतुं प्रयत्नस्तु विधीयमानः अस्ति । प्रयत्नस्यास्याङ्गत्वेन प्राचीनग्रन्थानां शब्दभाण्डागारस्य संशोधनं क्रियमाणं दृश्यते।

- **संस्कृतभाषाव्यवहारवैविध्यम्**

संस्कृतभाषाव्यवहारे विविधता दृश्यते । पूर्वं तु यदा इयं जनभाषा आसीत् तदा विभिन्नरीत्या अस्याः प्रयोगः आसीत् । वेदकालस्य संस्कृतभाषायाः प्रयोगे अद्यतनीयप्रयोगे च महान् व्यत्यासः दृश्यते। तदा बहवः शब्दाः विभिन्नतया प्रयुज्यमानाः अवर्तन्त। तदनु पुराणकाले सरला भाषा प्रयुज्यमाना आसीत्। अतः संस्कृतज्ञैः लीलया अवगन्तुं शक्यते पुराणभाषा। तदनु काव्यकाले आदौ सरला सुन्दरी च भाषा आसीत्। परं यदा शास्त्राणि प्रवृद्धानि तदा तु प्रौढभाषाप्रयोगः समारब्धः। आधुनिके तु व्यवहारे एव नास्ति संस्कृतम्। अतः प्रयोगस्तु प्रयोक्त्रधीनः इति मन्तव्यम्।

- **प्रस्तुतता**

संस्कृतभाषाप्रयोगः अधुनापि अर्वाचीनकाले प्रस्तुतताम् अर्हति । सामान्यजनव्यवहारात् च्युतास्ति इयं संस्कृतभाषा । अतः पुनः सामाजिकव्यवहारपथं प्रति एतस्याः भाषायाः आनयनाय संस्कृतभाषाप्रयोगः नितरां वर्धनीयः । सरला शुद्धा आकर्षिका च संस्कृतभाषा एव प्रयोक्तव्या समाजे । संस्कृतेनापि लोकव्यवहारः साध्यः

इति सर्वे जनाः जानीयुः । अस्यामपि भाषायां वैज्ञानिकांशाः वैचारिकतत्त्वांशाः भूयांसः सन्ति इति यदि जानन्ति तदा बहवः विद्यार्थिनः जनाः अपि अस्याः भाषायाः पठनाय अग्रे आगच्छन्ति । समाजे अपि अस्याः भाषायाः व्यवहारं स्वयमारभन्ते । समाजस्थानितरानपि समुचितरीत्या अस्याः प्राचीनभाषायाः व्यवहाराय जागरयन्ति च ।

- **वैयाकरणसिद्धान्तकौमुदी**

व्याकरणपठितॄणां व्याकरणक्षेत्रं प्रति प्रवेशः सिद्धान्तकौमुदीपठनमन्तरा दुष्करः एव । एतादृशः अत्यपूर्वः ग्रन्थः प्रायशः व्याकरणे नास्त्यन्यः । अष्टाध्याय्यां तु सूत्राणि प्रकरणानुसारेण नोपदिष्टानि । अतः लक्ष्यलक्षणसमन्वयावसरे सामान्याध्येतारः क्लेशमनुभवन्ति । अमुं क्लेशं परिहर्तुमनाः तत्रभवान् भट्टोजिदीक्षितः प्रकरणानुसारेण प्रक्रियानुरोधेन च सूत्राणि पुनः व्यवस्थाप्य सिद्धान्तकौमुदीं प्रणीतवान् ।

व्याकरणम् अधीते वेत्ति वा - वैयाकरणः, वैयाकरणानां सिद्धान्तः वैयाकरणसिद्धान्तः, वैयाकरणसिद्धान्तानां कौमुदी - वैयाकरणसिद्धान्तकौमुदी इति विग्रहः ।

व्याकरणशास्त्रपारङ्गतानां विदुषां सिद्धन्तान् अयं ग्रन्थः चन्द्रज्योत्स्ना इव प्रकाशीकुरुते इत्यर्थकं नाम अस्य ग्रन्थस्य अन्वर्थं भवति । अधीतमहाभाष्यादिग्रन्थः भट्टोजिदीक्षितः वैयाकरणसिद्धान्तकौमुदीं शब्दकौस्तुभं च लिलेख । अत्र तेन सिद्धान्तकौमुद्याम् एकस्याः प्रक्रियायाः निर्वाहाय यानि सूत्राणि अपेक्षितानि तानि एकत्रैव सङ्गृहीतानि । तद्वचनरीत्या सिद्धान्तकौमुद्यां लौकिकशब्दानां दिङ्मात्रदर्शनं विस्तरस्तु शब्दकौस्तुभे तेनैव दर्शितम् । तदुक्तं -

**इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् ।**
**विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे ॥ ४**

भागद्वये यथाप्रक्रियं सूत्राण्युक्तानि अस्मिन् ग्रन्थे । अत्र प्रक्रियानुरोधेन पाणिनिमहर्षिणा प्रोक्तानि सर्वाण्यपि सूत्राणि भट्टोजिदीक्षितेन स्वग्रन्थे सङ्गृहीतानि । पूर्वभागे पाणीनेः अष्टाध्याय्यां चतुर्थपञ्चमाध्यायगोचराः, उत्तरभागे तृतीयाध्यायस्थाः च प्रत्ययाः भट्टोजिदीक्षितेन प्रक्रियामनुसृत्य प्रोक्ताः ।

**पूर्वार्धे कथितास्तुर्यपञ्चमाध्यायगोचराः ।**
**प्रत्यया इह कथ्यन्ते तृतीयाध्यायगोचराः ॥** [५]

- **सिद्धान्तकौमुदी संस्कृतव्याहारव्यवहारश्च**

संस्कृतभाषाप्रयोगविषयः अत्र पूर्वमेव निगदितः । संस्कृतभाषायाः संरक्षणाय संवर्धनाय सम्प्रतिष्ठापनाय सम्प्रसारणाय च नूनं सर्वे जनाः अपि संस्कृतेनैव व्याहारेण भाषेरन् । परमत्र प्रश्नः उदेति व्याहारव्यवहारावसरे कीदृशी भाषा प्रयोज्या ? प्रौढा विद्वन्मात्रवेद्या ? उत सरला सर्वजनग्राह्या ? अथवा ग्राम्या व्याकरणनियमरहिता ? इति। प्रथमविकल्पस्तु न। यतः यदि भाषाप्रयोगः विद्वद्भिः एव अवगम्यते तर्हि सङ्कुचितो भूत्वा नष्टो भवत्येव। सामान्यजनाः भीत्या भाषापठनाय न उत्सहन्ते। नापि तृतीयो विकल्पः। व्याकरणमन्तरा भाषा दुष्टा भवति। यतः शब्दानुशासनं नाम असाधुशब्देभ्यः साधुशब्दानां विविच्य बोधनम्।

अतः अस्माभिः द्वितीयो विकल्पः स्वीक्रियेत। व्याकरणरीत्या शुद्धा प्रयोगदृष्ट्या सरला सर्वमनोहारिणी च भाषा सर्वैः प्रयोक्तव्या। भाषाशुद्धिः सर्वदा परिरक्षणीया। यद्यपि असाधुशब्दैरपि बोधो भवेत्। भावावगमनं व्याकरणमन्तरापि भवेत्। तथापि कश्चन नियमः भाषायाः व्याकरणरूपः विद्येत । तदा सर्वत्र एकरूपः भाषाप्रयोगः सङ्गच्छते । अतः भाषाप्रयोगाय व्याकरणं शरणीकरणीयमेव।

साधुशब्दज्ञानेनैव शुद्धभाषाज्ञानं सम्पद्यते । व्याकरणेन एव साधुशब्दाः असाधुशब्देभ्यः विविच्य बोध्यन्ते। व्याकरणनियमानुगुणत्वमेव साधुत्वस्य प्रथमं लक्षणं भवति । प्रकृतिप्रत्ययविवेकस्तु पाणिनिव्याकरणेन अवगम्यते । सूत्रानुसारी प्रयोगः एव शुद्धभाषाप्रयोगः।

एवं पाणिनीयव्याकरणं भाषाप्रयोगज्ञानाय अत्यावश्यकमिति विदितम्। परं सन्ति महाभाष्यकाशिकादिग्रन्थाः बहवः। कः ग्रन्थः पठनीयः ? इति संशयः उदयते मनसि। सम्पूर्णव्याकरणशास्त्रावगाहनाय नूनं सर्वे ग्रन्थाः गुरुमुखात् अध्येयाः एव । परं सरलभाषाप्रयोगाय सिद्धान्तकौमुदी एव सर्वैः अनुसर्तव्या । अस्मिन् ग्रन्थे लक्ष्यलक्षणसमन्वयः सरलरीत्या दत्तः।

अतः एव सर्वशास्त्रज्ञाः संस्कृताभिमानिनः च स्वगृहे सिद्धान्तकौमुदीं स्थापयन्ति। संस्कृतज्ञः यः कोऽपि अमुं ग्रन्थम् अवगन्तुं पारयति। परम् अन्यान् ग्रन्थान्

दुरूहान् तु केवलं शास्त्रनदीष्णाः एव अवगच्छन्ति । किञ्च शब्दस्य प्रयुज्यमानस्य प्रकरणं ज्ञात्वा साधुत्वम् अन्वेष्टुं शक्नुवन्ति।

सिद्धान्तकौमुदी प्रकरणानुसारिणी वर्तते । तथैव सर्वसंस्कृतज्ञप्रियः नामलिङ्गानुशासनापरनामा अमरकोषः कौमुदीस्थोदाहरणानि बहूनि यथायथं वहति । अतः व्याहारव्यवहारः सिद्धान्तकौमुदीं विना सुकरः न भवति इति ज्ञायते । पूर्वकाले संस्कृतभाषया व्यवहारः अवर्तत इति सर्वविदितमेव । एतस्य प्रमाणभूताः अंशाः बहवः दृश्यन्ते सिद्धान्तकौमुद्याम् । ग्राम्यैः नागरैः सामान्यैः च प्रयुज्यमानाः शब्दाः अनेके सूत्रेषु निगदिताः वर्तन्ते । तेषां विवरणं सिद्धान्तकौमुद्यां प्रदत्तम् । अधुना संस्कृतभाषां पुनः व्यवहारपथं प्रति आनेतुम् एते शब्दाः उपयोक्तुं शक्यन्ते । ते अधुनापि प्रस्तुताः एव । तादृशानि कानिचन उदाहरणानि इह पश्यामः ।

एषु बहूनि पदानि ग्राम्यैः कृषिकार्यसन्दर्भे, जनैः परिहाससमये, ग्रामेषु परस्परवार्तालापसमये चेत्यादिषु सामान्यसन्दर्भेषु यथा अधुना इतरभाषापदानि प्रयुज्यन्ते तथैव सलीलं संस्कृतभाषया प्रयुज्यन्ते स्म । यथा -**तिष्ठद्गुप्रभृतीनि च** [६] । तिष्ठद्गुप्रभृतीनि पदानि निपात्यन्ते इति सूत्रार्थः । तिष्ठन्ति गावः यस्मिन् काले सः तिष्ठद्गु - दोहनकालः । एवमेव वहद्गु, आयतीगवं, आयतीयवं चेत्यादीनि पदानि ग्राम्यजनैः कालसूचनाय प्रयुज्यमानानि आसन् । एतेन सुस्पष्टं ज्ञायते यत् विद्याविहीनाः ग्राम्याः जनाः अपि संस्कृतभाषया सम्भाषमाणाः आसन् इति।

एवमेव **प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च** [७] इति सूत्रे परिहासाय संस्कृतभाषा उपयुज्यमानासीदिति ज्ञायते । उदाहरणार्थम् - भोजनाय विलम्बेन आगतम् उद्दिश्य परिहासाय **'एहि मन्ये ओदनं भोक्ष्यसे' 'न हि भोक्ष्यसे भुक्तः स अतिथिभिः'** इति वाक्यं जनाः प्रयञ्जानाः आसन् ।

एवमेव **पात्रेसमितादयश्च** [८] इति सूत्रेण बहवः सामान्यव्यावहारिकशब्दाः उक्ताः । परिहाससन्दर्भे एते प्रयुज्यमानाः अवर्तन्त । यथा - कार्यम् अकुर्वन् भोजनसमये एव उपस्थितं **'पात्रेसमितः'** इति, कार्येषु असमर्थं **'मातरिपुरुषः'** इति गृहे एव शूरत्वप्रदर्शकं चोद्दिश्य **'गेहशूरः'** चेत्येवं प्रकारेण पदानि प्रयुज्यमानान्यासन् । **धान्यानां भवने क्षेत्रे खञ्** [९] इत्यस्य सूत्रस्य उदाहरणत्वेन मौद्गल्यं, व्रैहेयं, तैलीनं चेत्यादयः कृषिसम्बद्धाः

शब्दाः प्रदत्ताः । **कणेमनसि श्रद्धाप्रतीघाते** [१०] इत्यस्य सूत्रस्य उदाहरणरूपेण **'कणेहत्य पयः पिबति', 'मनोहत्य पयः पिबति'** (अभिलाषानिवृत्तिपर्यन्तं पिबतीत्यर्थः) वाक्यानि दत्तानि । एतानि सामन्यव्यवहारं द्योतयन्ति । एवमेव **'दूराद्धूते च'** चेत्यादीनि प्लुतविधायकानि सूत्राणि सम्बोधनं संसूच्य व्यवहारं प्रदर्शयन्ति।

- **निष्कर्षः**

एवमेव सिद्धान्तकौमुद्यां दत्तानि **ऋणार्णम्, समयाकरोति, कर्णेटिरटिरः, कर्णेपिशपिशः, मसमसाकरोति, वैयाकरणखसूचिः, मीमांसकधुर्धुरूटः, शीतालुः, उष्णालुः, पथिप्रज्ञः, जटापटि, समांसमीना, गव्यूतिः** चेत्यादीनि बहूनि उदाहरणानि संस्कृतस्य व्यावहारिकत्वं निश्चप्रचं दर्शयन्ति । अतः अधुना एतेषांशब्दानां पुनः प्रयोगाय प्रयत्नः विधेयः सर्वैः । आधुनिके काले संस्कृतव्याहारव्यवहारे शब्दाभावः इति केचन मन्यन्ते । ते एतानि एतादृशानि च बहूनि उदाहरणानि आमूलचूलं पश्येयुः । सर्वमप्यस्ति अस्माकं पुरातनग्रन्थेषु । किन्त्वस्माकम् अन्वेषणबुद्धिः सदा जागरूका भवेत् । तदैव संस्कृतम् अभिवर्धते, वयमप्यभिवर्धामहे । तेनैव महता प्रयासेन संस्कृतव्याहारव्यवहारः पुनः समाजे राज्ये देशे च प्रसरीसरीति ।

- **पादटिप्पण्यः**

१. महाभाष्यम् - पस्पशाह्निकम् ।
२. अष्टाध्यायी - ०३ - ०२ - १०८ ।
३. अष्टाध्यायी - ०२ - ०४ - ३९ ।
४. सिद्धान्तकौमुदी, उत्तरभागः, अन्तिमश्लोकः ।
५. सिद्धान्तकौमुदी, उत्तरभागः, मङ्गलश्लोकः ।
६. अष्टाध्यायी - ०२ - ०१ - १७ ।
७. अष्टाध्यायी - ०१ - ०४ - १०३ ।
८. अष्टाध्यायी - ०२ - ०१ - ४८ ।
९. अष्टाध्यायी - ०५ - ०२ - ०१ ।
१०. अष्टाध्यायी - ०१ - ०४ - ६६ ।

## ಕರ್ನಾಟಕ ಸಂಸ್ಕೃತ ಕಾಲೇಜುಗಳ ಬೋಧಕ ಮತ್ತು ಬೋಧಕೇತರ ಸಂಘ (ರಿ.)


### ಕಾರ್ಯಕಾರಿ ಸಮಿತಿ



**ಡಾ. ನಾಗೇಂದ್ರ**
ಅಧ್ಯಕ್ಷರು



**ಡಾ. ಶಂಕರ ನಾ ಭಟ್ಟ**
ಉಪಾಧ್ಯಕ್ಷರು



**ಡಾ. ಮಂಜುನಾಥ ಭಟ್ಟ**
ಕಾರ್ಯದರ್ಶಿ



**ವಿದ್ವಾನ್ ನವೀನಕುಮಾರ ಎಚ್.ಆರ್**
ಸಹಕಾರ್ಯದರ್ಶಿ



**ವಿದ್ವಾನ್.ವಿ.ಎಲ್.ಯರಗಟ್ಟಿ**
ಖಜಾಂಚಿ



**ವಿದ್ವಾನ್ ಸತ್ಯನಾರಾಯಣ ವೆಂಕಟರಾವ್**
ನಿರ್ದೇಶಕರು



**ವಿ. ದೇವರಾಜು ಎಸ್.**
ನಿರ್ದೇಶಕರು



**ಪ್ರೋ. ಕೆ. ಅನಂತಕೃಷ್ಣ ಉಪ್ಪಾರ್**
ನಿರ್ದೇಶಕರು



**ಎಂ.ಬಿ. ಕದಮ್**
ನಿರ್ದೇಶಕರು